# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-4)** **प्रश्नपत्रम् – 8** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C.E.-2.4.8 (Old)** समयः - 3 तः 6 पर्यन्तम्

दिनाङ्कः –8/04/2019 सन्दर्भग्रन्थः – मनुस्मृतिः (7-8 अध्यायाः)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 द्वयोः ससन्दर्भं व्याख्या कार्या। 08**

(1) ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् ॥

(2) तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु ॥

(3) सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषङ्गिणः।
पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मवान् ॥

**प्रश्नः-2 कस्याप्येकस्य परिचयात्मकं वर्णनं लिखत। 08**

(1) राज्ञः मन्त्रणेति सविस्तरं परिचाययत।

(2) राजधर्मान् यथाग्रन्थं निरूपयत।

**प्रश्नः-3 टिप्पणीद्वयं लिखत। 04**

(1) दूतलक्षणम्।

(2) राष्ट्ररक्षा।

(3) दुर्गप्रकाराः।

(4) राज्ञः प्रशंसा।

**प्रश्नः-4 पञ्चानामतिलघूत्तराणि लिखत। 05**

(1) राज्ञा कीदृशः मन्त्री नियोक्तव्यः?

(2) दुर्गप्रकारान् लिखत।

(3) शत्रवः कतिधा भवन्ति?

(4) राज्ञः कति उपचारास्सन्ति?

(5) कीदृशाय ब्राह्मणाय राज्ञा धनधान्यादि प्रदेयानि?

(6) कामजाः कति? के च ते?

(7) मनुस्मृतेः सप्तमाध्यायस्य नाम किम्?

## द्वितीयान्वितिः (Unit-2)

**प्रश्नः-5 कयोश्चित् द्वयोः श्लोकयोः ससन्दर्भं भावार्थं लिखत। 08**

(1) बालदायादिकं रिक्थं तावद्राजाऽनुपालयेत्।
यावत्स स्यात्समावृत्तो यावच्चातीतशैशवः ॥

(2) नार्तो न मत्तो नोन्मत्तो न क्षुतृष्णोपपीडितः।
न श्रमार्तो न कामार्तो न क्रुद्धो नापि तस्करः ॥

(3) कर्मणाऽपि समं कुर्याद्धनिकायाधमर्णिकः ॥
समोऽवकृष्टजातिस्तु दद्याच्छ्रेयांस्तु तच्छनैः ॥

**प्रश्नः-6 कस्याप्येकस्य समीक्षा कार्या। 08**

(1) अष्टादशविवादान् यथाग्रन्थं विमृशत।

(2) मनुस्मृत्यनुसारेण कीदृशः साक्षी योग्यो भवति?

**प्रश्नः-7 एकस्य समीक्षा कार्या। 02**

(1) सदाचारः।

(2) परधनहरणम्।

**प्रश्नः-8 अतिलघूत्तरे लिख्येताम्। 02**

(1) हव्यकव्ययोः अनधिकारिणः के सन्ति?

(2) अचारहीनाः के सन्ति?

(3) दण्डभेदाः के सन्ति?

**(4)** साक्षी केन पूयते?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-9 निम्ननिर्दिष्टेषु द्वयोः ससन्दर्भं व्याख्या कार्या। 08**

(1) यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः।
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम् ॥

(2) गोषु ब्राह्मणसंस्थासु छुरिकायाश्च भेदने।
पशूनां हरणे चैव द्यः कार्योऽर्घपादिकः ॥

(3) उपचारक्रिया केलिः स्पर्शो भूषणवाससाम्।
सह खट्वासनं चैव सर्वं संग्रहणं स्मृतम् ॥

**प्रश्नः-10 एकस्य सविस्तरं विवरणं लिखत।** **08**

(1) मनूदीतेऽस्मिन् ग्रन्थे सप्तपदीविषये विविच्यताम् ।

(2) सप्तदशदासप्रकारान् सविस्तरं लिखत।

**प्रश्नः-11 टिप्पणीद्वयं लिखत।** **04**

(1) सीमासाक्षिणः।

(2) स्त्रीसंग्रहणम्।

(3) स्तेनकर्म।

(4) तुलादिपरीक्षा।

**प्रश्नः-11 पञ्चानां लघूत्तराणि लिखत।** **05**

(1) आततायिनः के सन्ति?

(2) निर्धनाः के सन्ति?

(3) दासयोनयः कति विद्यन्ते?

(4) श्रोत्रियः क उच्यते?

(5) ब्राह्मणस्य कृते प्राणदण्डः कः अस्ति?

(6) धर्मशब्दस्य कोऽर्थः?

(7) श्रुतिशब्दस्य कोऽर्थः?